श्रीहनुमत्स्तवः

{॥ श्रीहनुमत्स्तवः ॥}

कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम् ।

उद्यदादित्यसङ्काशमुदारभुजविक्रमम् ॥ १॥

श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ।

अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥ २॥

वामहस्तं महाकृत्स्नं दशास्यशिरखण्डनम् ।

उद्यद्दक्षिणदोर्दण्डं हनूमन्तं विचिन्तयेत् ॥ ३॥

बालार्कायुततेजसं त्रिभुवनप्रक्षोभकं सुन्दरं

सुग्रीवाद्यखिलप्लवङ्गनिकरैराराधितं साञ्जलिम् ।

नादेनैव समस्तराक्षसगणान् सन्त्रासयन्तं प्रभुं

श्रीमद्रामपदाम्बुजस्मृतिरतं ध्यायामि वातात्मजम् ॥ ४॥

आमिषीकृतमार्ताण्डं गोष्पदीकृतसागरम् ।

तृणीकृतदशग्रीवमाञ्जनेयं नमाम्यहम् ॥ ५॥

चित्ते मे पूर्णबोधोऽस्तु वाचि मे भातु भारती ।

क्रियासुर्गुरवः सर्वे दयां मयि दयालवः ॥ ६॥

Stotram Digitalized By Sanskritdocuments.org

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Hanumath Stavam Lyrics in Devanagari PDF
% File name : hanumatstava.itx
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Processed by Sowmya Ramkumar
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Latest update : September 19, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website